गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। त्रिष्टुप्

**अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः।**

**कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि॥ २.०१४.०१**

अध्वर्यवः- हे ध्वरहितकर्मेच्छव उपासकाः। इन्द्राय- परमेश्वराय। सोमम्- अध्यात्मरसम्। भरत- वहत। अत्रेभिः- रसोपलब्धिस्थानप्रतीकचमसैः। मद्यम्- आनन्दकरम्। अन्धः- रसम्। आ सिञ्चत- क्षरत निष्पादयत। सदम्- सदैव। अस्य- एतस्य रसस्य। पीतिम्- अनुभूत्याः। कामी- इच्छुकः। हि- खलु। वीरः- वीर्यसम्पन्नः। वृष्णे- वर्षकाय। जुहोत- समर्पयत। तदित्- तदेव। एषः- अयम्। वष्टि- कामयते ॥१ ॥

**अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम्।**

**तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य॥ २.०१४.०२**

अध्वर्यवः- सर्वभूतहितकर्मेच्छवः। नञो विरोधार्थत्त्वात्। अपः- आधारशक्तिधाराः। वव्रिवांसम्- आवारयन्तम्। वृत्रम्- आवरणम्। अशन्या इव वृक्षम्- अशनिना तरुमिव। जघान- विनाशितवान्। तस्मै- अमुष्मै। तद्वशाय- रसकामाय। एतम्- एनं रसम्। भरत- वहत। एषः- अयम्। इन्द्रः- परमेश्वरः। अस्य- एतस्य रसस्य। पीतिम्- अनुभूतिम्। अर्हति ॥२ ॥

**अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः।**

**तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः॥ २.०१४.०३**

अध्वर्यवः। यः। दृभीकम्- विदारकं भयङ्करम्। जघान- हिंसितवान्। यः। गाः- चिद्रश्मीन्। उदाजत्- निरगमयत्। वलम्- आवरणम्। वल संवरणे। अप वः- अपावृणोत्। तस्मै- अमुष्मै।

Dr. Ranganji
WEBOLIM

एतम्- एनं सोमं रसम्। अन्तरिक्षे- प्राणमयकोशे। वातं न- प्राणमिव व्याप्तं कुरुत। जूः- जीर्णः। वस्त्रैर्न- वस्त्रैरिव। सोमैः- रसैः। आ ऊर्णुत- आच्छादयत ॥३॥

**अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून्।**
**यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत॥ २.०१४.०४**

अध्वर्यवः। यः। नव नवतिं बाहून्। चख्वांसम्- प्रदर्शयन्तम्। चष्टेरिदं रूपमिति सायणः। उरणम्-मेषबलम्। जघान- विनाशितवान्। यः। अर्बुदम्- मेघं जडोपलक्षितम्। अव नीचा बबाधे- अपां मूलशक्तिधाराणां निःसारणाय अधः पातयित्वा बाधितवान्। तमिन्द्रम्। सोमस्य- रसस्य। भृथे- निर्वाहे। हिनोत- प्रेरयत ॥४॥

**अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम्।**
**यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत॥ २.०१४.०५**

अध्वर्यवः। यः। स्वश्नम्- अदनशीलम्। जघान- बाधितवान्। यः। अशुषम्- अशोषणीयम्। शुष्णम्- शोषकम्। व्यंसम्- विगताङ्गमकरोत्। यः। पिप्रुम्- आपूर्यमाणम्। नमुचिम्- न मुञ्चन्तं बन्धकमिति भावः। रुधिक्राम्- पापरोधकनियमक्रमणशीलमत्याचारयुक्तमिति भावः। जघान। तस्मै। इन्द्राय। अन्धसः- अन्नानि। जुहोत- जुहुत ॥५॥

**अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः।**
**यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै॥ २.०१४.०६**

अध्वर्यवः। यः। शम्बरस्य- मेघस्य जडप्रतीकस्य। शतम्- बहूनि। पूर्वीः- प्राचीनानि। पुरः- बन्धनान्यावरणानि। अश्मनेव- वज्रेणेव। बिभेद। यः। वर्चिनः- तेजस्वी। इन्द्रः। शतं सहस्रम्- प्रभूतम्। अपावपत्- पातयति। अस्मै। सोमम्- रसम्। भरत- वहत ॥६॥

**अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान्।**

Dr. Rangaji
WEBOLIM

**कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै॥ २.०१४.०७**

अध्वर्यवः। भूम्याः- पृथिव्याः। उपस्थे- उत्सङ्गे। यः। शतं सहस्रम्- प्रभूतम्। अवपत्- अपातयत्। जघन्वान्- जघान। कुत्सस्य- कर्मशीलस्य। कुत्सा एते हर्यश्वाय शूषमिति श्रुतावेवमेव दृश्यते। आयोः- मनुष्यस्य। अतिथिग्वस्य- अतिथिभिर्गम्यस्योपासकस्य। वीरान्- शत्रूनन्तरायप्रतीकान्। न्यवृणक्- अवधीत्। भरत सोममस्मै ॥७॥

**अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे।**
**गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत॥ २.०१४.०८**

अध्वर्यवः। नरः- नेतारः। कामयाध्वे। श्रुष्टी- क्षिप्रम्। वहन्तः- रसं धारयन्तः। इन्द्रे- ईशनाधिदैवते। तत्। नशथ- प्रापयथ। श्रुताय- श्रुतिस्थाय। इन्द्राय- परमेश्वराय। गभस्तिपूतम्- अङ्गुळ्युपलक्षितशोभनकर्मपूतम्। सोमम्- रसम्। भरत- धारयत। यज्यवः- हे यष्टारः। जुहोत- जुहुत ॥८॥

**अध्वर्यवः कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम्।**
**जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत॥ २.०१४.०९**

अध्वर्यवः। श्रुष्टिम्- सुखम्। कर्तन- कुरुत। वने- सम्भजनीये। वने- जीवोदके। निपूतम्- शोधितम्। उन्नयध्वम्- उन्नयत। जुषाणः- सेवमानः। वः- युष्माकम्। हस्त्यम्- शोभनकर्मनिष्पन्नम्। अभि वावशे- अभिकामयते। इन्द्राय- परमेश्वराय। मदिरम्- तृप्तिकरम्। मदी तृप्तियोगे। सोमम्- रसम्। जुहोत- समर्पयत ॥९॥

**अध्वर्यवः पयसोधर्यथा गोः सोमेभिरीं पृणता भोजमिन्द्रम्।**
**वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत॥ २.०१४.१०**

Dr. Ranganji

WEBOLIM

अध्वर्यवः। गोः- धेनोः। ऊधः। यथा। पयसा- क्षीरेण। तथा। सोमेभिः- रसैः। भोजम्- सम्भक्तारम्। ईम्- एनम्। इन्द्रम्- परमेश्वरम्। पृणत- पूरयत। मे- मम। अस्य- सोमस्य। निभृतम्- गूढम्। एतत्- सुखसाधनस्वभावम्। अहम्। वेद- जानामि। भूयः। यजतः- पूज्य इन्द्रः। दित्सन्तम्- दातुमिच्छन्तम्। चिकेत- जानाति ॥१० ॥

**अध्व॑र्यवो॒ यो दि॒व्यस्य॒ वस्वो॒ यः पार्थि॑वस्य॒ क्षम्य॑स्य॒ राजा॑।**
**तमूर्द॑रं॒ न पृ॑णता॒ यवे॒नेन्द्रं॒ सोमे॑भि॒स्तदपो॑ वो अस्तु॥ २.०१४.११**

अध्वर्यवः। यः। दिव्यस्य वस्वः- दिव्यसम्पदः। पार्थिवस्य क्षम्यस्य- भूमेश्च। राजा- स्वामी। तम्। इन्द्रम्- परमेश्वरम्। ऊर्दरम्- कुसूलम्। ऊर्ध्वं दीर्णमूर्दरम्। यवेन। न- इव। पृणत- पूरयत। सोमेभिः- रसैः। तदपः- तत्कर्म। वः- युष्माकम्। अस्तु- भवतु ॥११ ॥

**अ॒स्मभ्यं॒ तद्व॑सो दा॒नाय॒ राधः॒ सम॑र्थयस्व ब॒हु ते॑ व॒स॒व्य॑म्।**
**इन्द्र॒ यच्चि॒त्रं श्र॑व॒स्या अनु॒ द्यून्बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.०१४.१२**

पूर्वसूक्ते व्याख्यातम् ॥१२ ॥

Dr. Ranganji
WEBOLIM